# अभ्यास-प्रश्नपत्रम् - 2020-21 (Set -1)

**कक्षा - दशमी**

**संस्कृतम् (कोड-122)**

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्–**

**'अ' - भागः (बहुविकल्पात्मकः) 40 अङ्काः**

**'आ' - भागः (वर्णनात्मकः) 40 अङ्काः**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' – भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' – भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**'अ'-भागः 40 अङ्काः**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | **अनुप्रयुक्त-व्याकरणम्** | |
|---|---|---|
| 1. | **अधोलिखितेषु रेखांकितपदानां सन्धिपदं सन्धिच्छेदपदं वा चिनुत –** (केवलं प्रश्नचतुष्टयम्)<br>(i) महानगरमध्ये <u>**चलदनिशं**</u> कालायसचक्रम्।<br>(क) चल +अनिशम् (ख) चलत् +अनिशम् (ग) चलद +अनिशम्<br>(ii) <u>**उदीरितोऽर्थः**</u> पशुनापि गृह्यते।<br>(क) उदीर+अर्थः (ख) उद +ईरितः (ग) उदीरितः +अर्थः<br>(iii) अयोग्यः पुरुषः नास्ति <u>**योजकः**</u>+<u>**तत्र**</u> दुर्लभः।<br>(क) योजकस्तत्र (ख) योजकश्तत्र (ग) योजक तत्र<br>(iv) <u>**कः**</u> + <u>**चित्**</u> कृषकः आसीत्।<br>(क) कसचित् (ख) कचित् (ग) कश्चित्<br>(v) कुसुमावलिः समीरचालिता <u>**स्यान्मे**</u> वरणीया।<br>(क) स्यात् +मे (ख) स्यान् +मे (ग) सयाद् +मे | **1x4=4** |

| | | |
|---|---|---|
| 2. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** (केवलं प्रश्नचतुष्टयम्)<br>(i) तत्र राजसिंहः नाम **राज्ञः पुत्रः** वसति स्म।<br>(क) राजा पुत्रः (ख) राजपुत्रः (ग) राजस्य पुत्रः<br>(ii) सर्वेषां महत्त्वं विद्यते **समयम् अनतिक्रम्य**।<br>(क) यथासमयम् (ख) समयानतिकारम्य (ग) उपसमयम्<br>(iii) वानरः (**सगर्वम्**) अत एव कथयामि यत् अहमेव योग्यः वनराजपदाय।<br>(क) गर्व सहितम् (ख) गर्वेण सहितम् (ग) गर्विताम्<br>(iv) **वाष्पयानानां माला** संधावति वितरन्ति ध्वानम्।<br>(क) वाष्पयानमाला (ख) वाष्पयानम् (ग) वाष्पयानाय<br>(v) काकः कृष्णः पिकः कृष्णः को भेदः **पिककाकयोः।**<br>(क) पिकस्य च काकस्य च (ख) पिकं काकम् च (ग) पिक काक | **1x4=4** |
| 3. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) वाक्पटुः **धैर्यवान्** मंत्री सभायामप्यकातरः।<br>(क) धैर्य + मतुप् (ख) धीर + मत (ग) धैर्य +क्तवतु<br>(ii) **छात्रा** लेखं लिखति।<br>(ख) छात्र + ङीप (ग) छात्र + त्व (ग) छात्र+ टाप्<br>(iii) जम्बुकः – स्वामिन् ! यत्रास्ते सा **धूर्त** +**टाप्** तत्र गम्यताम्।<br>(क) धूर्त (ख) धूर्ता (ग) धूर्तत्व<br>(iv) राजसिंहस्य भार्या **बुद्धि + मतुप्** आसीत्।<br>(क) बुद्धिमती (ख) बुद्धिमत् (ग) बुद्धिमान्<br>(v) ज्ञानस्य **महत् +त्व** सर्वे जानन्ति।<br>(क) महत्त्वम् (ख) महत् (ग) महत्व | **1x4=4** |
| 4. | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) आदर्शः – अखिल! ........ किं करोषि?<br>(क) त्वया (ख) त्वम् (ग) अहम्<br>(ii) अखिलः - मया लेखः.......।<br>(क) लिख्यते (ख) लिखामि (ग) लिखति<br>(iii) आदर्शः – शोभनम् ! त्वं सुंदरं........ लिखसि।<br>(क) लेख (ख) लेखः (ग) लेखम्<br>(iv) अधुना.......... संस्कृतस्य अभ्यासः क्रियते।<br>(क) अहम् (ख) मया (ग) त्वम् | **1x3=3** |
| 5. | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम)**<br>(i) दिनेशः प्रातः 6:00....... योगाभ्यासं करोति। | **1x4=4** |

| | | |
|---|---|---|
| | (क) षड्वादने (ख) सपादषड्वादने (ग) सार्धषड्वादने<br>(ii) सः प्रातः 6:45....... अल्पाहारं स्वीकरोति।<br>(क) सपादसप्तवादने (ख) पादोन - षड्वादने (ग) पादोन सप्तवादने<br>(iii) सः प्रातः 8:30......... विज्ञानं पठति।<br>(क) सार्ध- अष्टवादने (ख) सपाद- अष्टवादने (ग) पादोन-अष्टवादने<br>(iv) सः प्रातः 9:15 हिन्दीभाषां पठति।<br>(क) नव वादने (ख) सार्ध-नववादने (ग) सपाद नववादने<br>(v) सः 10:00......... गणितं पठति।<br>(क) दशवादने (ख) सपाद दशवादने (ग) सार्ध दशवादने | |
| **6.** | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i)....... शनिवासरः अस्ति।<br>(क) श्वः. (ख) ह्यः (ग) अद्य<br>(ii) अहं ........ गृहं गमिष्यामि।<br>(क) श्वः (ख) ह्यः (ग) अद्य<br>(iii) दुर्वहम्....... जीवनं जातम्।<br>(क) कदा (ख) अत्र (ग) अलम्<br>(iv) प्रकृतिः ........ शरणम् अस्ति।<br>(क) एव (ख) वृथा (ग) कुत्र | **1x3=3** |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धपदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) त्वं पाठं **<u>पठति।</u>**<br>(क) पठन्ति (ख) पठसि (ग) पठति<br>(ii) सः **<u>मधुरः</u>** फलं खादति।<br>(क) मधुराः (ख) मधुरम् (ग) मधुराणि<br>(iii) सः पाठं **<u>पठ</u>**।<br>(क) पठतु (ख) पठामि (ग) पठन्तु<br>(iv) तौ उपवने **<u>क्रीडावः</u>**।<br>(क) क्रीडसि (ख) क्रीडामः (ग) क्रीडतः | **1x3=3** |
| | **पठितावबोधनम्** | |
| **8.** | **रेखांकित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत - (केवलं प्रश्नपञ्चकम्)**<br>(i) उद्याने **<u>पक्षिणां</u>** कलरवं चेतः प्रसादयति।<br>(क) केषाम् (ख) कुत्र (ग) केन<br>(ii) त्वं **<u>मानुषात्</u>** बिभेषि।<br>(क) कात् (ख) कस्मात् (ग) कया<br>(iii) **<u>सुराधिपः</u>** ताम् अपृच्छत्। | **1x5=5** |

| | | |
|---|---|---|
| | (क) कः (ख) का (ग) कस्य<br>(iv) **<u>पुत्रं</u>** द्रष्टुं सः प्रस्थितः।<br>(क) अम् (ख) कम् (ग) केन<br>(v) सः **<u>भारवेदनया</u>** क्रन्दति स्म।<br>(क) कस्याः ( ख) केन (ग) कया<br>(vi) **<u>तत्वार्थस्य</u>** निर्णयः विवेकेन कर्तुं शक्यः।<br>(क) कस्याः (ख) कस्य (ग) कस्मात् | |
| 9. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत-**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>(i) **<u>अनृतं</u>** वदसि चेत् काकः दशेत्।<br>(क) सत्यम् (ख) असत्यम् (ग) वृक्षम्<br>(ii) सः **<u>वित्तम्</u>** उपार्जितवान्।<br>(क) ज्ञानम् (ख) वाहनम् (ग) धनम्<br>(iii) **<u>अवक्रता</u>** यथा चित्ते तथा वाचि भवेद् यदि।<br>(क) सरलता (ख) कठिनता (ग) ज्ञानम्<br>(iv) पिको वसन्तस्य गुणं न **<u>वायसः।</u>**<br>(क) शुकः (ख) काकः (ग) गजः<br>(v) **<u>कृषीवलः</u>** क्रुद्धः अभवत्।<br>(क) वृषभः (ख) कृषकः (ग) इन्द्रः | **1x4=4** |
| 10. | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत-**<br>**(केवलं प्रश्नषट्कम्)**<br>(i) "कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्" अस्मिन् वाक्ये क्रियापदं किम्?<br>(क) मुञ्चति (क) कज्जलमलिनम् (ख) धूमम्<br>(ii) "क्रुद्धः सिंहः इतस्ततः धावति" अस्मिन् वाक्ये किं विशेषणपदम्?<br>(क) सिंहः (ख) धावति (ग) क्रुद्धः<br>(iii) "संपत्तौ च विपत्तौ च महतामेकरूपता" अस्मिन् वाक्ये 'संपत्तौ' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) महताम् (ख) विपत्तौ (ग) एकरूपता<br>(iv) "तस्मिन् गृहे चौरः प्रविष्टः" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>क) तस्मिन् (ख) गृहे (ग) प्रविष्टः<br>(v) "पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्" अस्मिन् वाक्ये किं कर्तृपदम्?<br>(क) विद्याधनम् (ख). पुत्राय (ग) पिता<br>(vi) "अपत्येषु च सर्वेषु जननी तुल्यवत्सला" अस्मिन् वाक्ये माता इत्यस्य पदस्य कृते किं पर्यायपदं प्रयुक्तम्?<br>(क) तुल्यवत्सला (ख) जननी (ग) अपत्येषु | **1x6=6** |

| | | |
|---|---|---|
| | (vii) "भवान् कुतः भयात् पलायितः?" अस्मिन् वाक्ये किम् अव्ययपदम्?<br>(क) भवान् (ख) भयात् (ग) कुतः | |

**'आ' - भागः**

**वर्णनात्मकाः प्रश्नाः 40 अङ्काः**

| **अपठितावबोधनम्** | | |
|---|---|---|
| 1<br>1 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br>एकं सुंदरं विशालं च उपवनम् आसीत्। तस्मिन् सुंदरे उपवने फलानाम् अनेके वृक्षाः आसन्। एकदा एकः जम्बूकः अत्र-तत्र भ्रमित्वा उपवनम् आगच्छत्। सः अतीव बुभुक्षितः आसीत्। उपवने सः द्राक्षालतां पश्यति। तस्यां लतायाम् अनेकानि द्राक्षाफलानि आसन्। कानिचित् पक्वानि द्राक्षाफलानि आसन् कानिचित् च अपक्वानि। तानि दृष्ट्वा सः जम्बूकः अचिन्तयत्- 'अद्य तु अहम् एतानि द्राक्षाफलानि खादिष्यामि। ' द्राक्षाफलानि प्राप्तुं सः उपरि - उपरि कूर्दते परन्तु द्राक्षाफलानि प्राप्तुं सः सफलः न अभवत्। सः पुनः पुनः उत्पतति परन्तु पुनः पुनः असफलः अभवत्। सः कुपितः भवति। सः द्राक्षाफलानि दृष्ट्वा कथयति - एतानि द्राक्षाफलानि अम्लानि सन्ति। अनन्तरं ततः स्वस्थानं गच्छति। | 10 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) जम्बूकः उपवने किं पश्यति?<br>(ii) किं जम्बूकः द्राक्षाफलानि प्राप्तुं सफलः अभवत्?<br>(iii) कः अतीव बुभुक्षितः आसीत् ? | (1x2=2) |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) फलानां अनेके वृक्षाः कुत्र आसन्?<br>(ii) द्राक्षाफलानि प्राप्तुं जम्बूकः किं करोति?<br>(iii) द्राक्षाफलानि कीदृशानि आसन्? | (2x2=4) |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षक संस्कृतेन लिखत।** | (1) |
| | **ई. यथानिर्देशम् उत्तरत- (केवल प्रश्नत्रयम्)**<br>(i) '**खादिष्यामि**' इत्यस्याः क्रियायाः कर्तृपदं किम्?<br>(क) अद्य (ख) एतानि (ग) अहम्<br>(ii) '**सुंदरे**' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत।<br>(क) उपवने (ख) फलानाम् (ग) वृक्षाः<br>(iii) '**उद्यानम्**' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?<br>(क) विशालम् (ख) उपवनम् (ग) अतीव<br>(iv) अनुच्छेदे '**पक्वानि**' इत्यस्य कः विपर्ययः आगतः?<br>(क) सुन्दराणि (ख) द्राक्षाफलानि (ग) अपक्वानि | (1x3=3) |

| | रचनात्मक-कार्यम् | |
|---|---|---|
| 12 | **भवान् सौरभः। स्वमित्रं राजीवं प्रति परीक्षायां सफलतायै वर्धापनार्थं लिखितं पत्रं मंजूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत।**<br>परीक्षाभवनम्, दिल्लीतः<br>दिनाङ्कः........<br>प्रियमित्र राजीव!<br>(i)...............<br>अत्र (ii).......... तत्रास्तु। भवतः (iii).......... सफलतायाः पत्रम् अधुना एव (iv)............। भवतः परीक्षापरिणामं ज्ञात्वा मनः (v)........... अभवत्। अहर्निशं प्रयासं कृत्वा भवान् 96 प्रतिशतं (vi).......... प्राप्तवान्। त्वं मम परिवारस्य (vii)...........अर्हसि। पत्रेण (viii)............... वर्धापनं कामये। (ix)........... सादरं नमः।<br>भवतः (X).........<br>सौरभः | 1/2x10=5 |
| | **मञ्जूषा**<br>प्राप्तम्, मित्रम्, अङ्कान्, पुनः, कुशलं, पितृभ्याम्, परीक्षायाः, साधुवादान्, प्रसन्नं, सप्रेम नमस्ते | |
| 13 | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–**<br> | **1x5=5** |

| | | |
|---|---|---|
| | **मञ्जूषा-**<br>आपणम्, स्वास्थ्यवर्धकम्, फलविक्रेता, भक्षणम्, कदलीफलानि, द्राक्षाफलानि, मधुकर्कटिका, अमृतफलम्, नारिकेलफलानि, जम्बूफलानि, ग्राहकाय, तोलयति | |
| | **अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**<br>**"वर्धमानं प्रदूषणम्"**<br>मञ्जूषा–<br>वैश्विक-उष्णता, यानानां व्यवहारः, विषाक्तवायुः, अवकरक्षेपणम्, जलप्रदूषणम्, वायुप्रदूषणम्, ध्वनिप्रदूषणम्, कोलाहलः, मलिनम्, शुचिपर्यावरणम्, यन्त्रागारम्, | 1x5=5 |
| 14 | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्)**<br>(i) तुम संस्कृत पढ़ते हो। You read sanskrit.<br>(ii दो शिक्षक पढ़ाते हैं। Two teachers Teach.<br>(iii) सैनिक देश की रक्षा करते हैं। Soldiers protect the country.<br>(iv) तुम सब अपना पाठ पढ़ो। You all read your lesson.<br>(v) बालक ने फल खाया। Boy ate the fruit.<br>(vi) रसोइए ने खाना पकाया। The cook cooked food.<br>(vii) हाथी धीरे धीरे चलता है। The elephant walks slowly. | 1x5=5 |
| | **पठितावबोधनम्** | |
| 15 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येण पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्।<br>पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कीदृशः गृही तस्मै आश्रयं प्रायच्छत्?<br>(ख) पिता कस्य रुग्णताम् आकर्ण्य व्याकुलो जातः?<br>(ग) निर्धनः जनः कं महाविद्यालये प्रवेशं दापयितुं सफलो जातः?<br><br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) निर्धनः जनः परिश्रम्य किम् उपार्जितवान्?<br>(ख) जनः कुत्र रात्रिनिवासं कृतवान्? | 3<br><br>(1/2x2=1)<br><br>(1x2=2) |

| | | |
|---|---|---|
| | (ग) कदा पदयात्रा न शुभावहा ? | |
| 16 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**गुणी गुणं वेत्ति न वेत्ति निर्गुणः**<br>**बली बलं वेत्ति न वेत्ति निर्बलः।**<br>**पिको वसन्तस्य गुणं न वायसः**<br>**करी च सिंहस्य बलं न मूषकः। ।**<br>**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम)**<br>(क) गुणी जनः कं वेत्ति?<br>(ख) पिकः कस्य गुणं जानाति?<br>(ग) निर्गुणः जनः कं न वेत्ति?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम)**<br>(क) सिंहस्य बलं कः जानाति?<br>(ख) वायसः कस्य गुणं न जानाति?<br>(ग) मूषकः कस्य बलं न जानाति.? | 3<br><br><br><br><br>(1/2x2=1)<br><br><br><br>(1x2=2<br>) |
| 17 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**सिंहः -** (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?<br>**एकः वानरः -** यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि।<br>**अन्यः वानरः -** किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -<br>**यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।**<br>**जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।।**<br>**काकः -** आम् सत्यं कथितं त्वया - वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।<br>**पिकः -** (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का - का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपम्, न ध्वनिरस्ति। कृष्णवर्णं मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) उपहसन् कः वदति?<br>(ख) क्रोधेन गर्जन् कः वदति?<br>(ग) मेध्यामेध्यभक्षकः कः अस्ति?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) यः वित्रस्तान् न रक्षति स कीदृशः भवति?<br>(ख) काकः स्वविषये किं कथयति?<br>(ग) कर्कशध्वनिः कस्य भवति? | 3<br><br><br><br><br><br><br><br><br><br><br><br>(1/2x2=1)<br><br><br><br>(1x2=2) |

| | | |
|---|---|---|
| **18** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**<br>**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**<br>**तस्माद् रक्षेद् सदाचारं प्राणेभ्योऽपि विशेषतः।।**<br>**अन्वयः -** प्रथमः धर्मः (i)........... इति एतद् (ii).......... वचः। विशेषतः (iii).......... अपि (iv)......... रक्षेत्।<br>**मञ्जूषा-**<br>**सदाचारम्, प्राणेभ्यः, विदुषाम्, आचारः**<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>**विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।**<br>**अश्वश्चेद् धावने वीरः भारस्य वहने खरः॥**<br>**भावार्थः -** अस्य श्लोकस्य भावः अस्ति यत् अस्मिन् (i)....................संसारे सर्वेषाम् वस्तूनां प्राणिनां च उपयोगिता अस्ति। किञ्चित् अपि (ii)........ न अस्ति। यथा (iii).......... अश्वः वीरः अस्ति तथैव (iv)....... वहने गर्दभस्य उपयोगिता अस्ति।<br>**मञ्जूषा–**<br>**भारस्य, निरर्थकम्, विचित्रे, धावने** | (1/2x4=2)<br><br>1/2x4=2 |
| **19** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत -**<br>(i) कृषकः प्रसन्नमनसा गृहम् आगच्छत्।<br>(ii) कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्।<br>(iii) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा रोदिमि।<br>(iv) क्रुद्धः कृषकः तम् उत्थापयितुं बहुवारं यत्नम् अकरोत् ।<br>(v) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्।<br>(vi) सुराधिपः अपृच्छत् - किमेवं रोदिषि?<br>(vii) दुर्बले सुते मातुः अभ्यधिका कृपा सहजा एव।<br>(viii) बहूनि अपत्यानि मे सन्ति इति सत्यम्। | 1/2x8=4 |